दशाश्वः, पुं, (दश अश्वा रथे यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ ( यथा, ग्रहयागतत्त्वे सोमध्याने ।
"दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधदैवतम् ।
जलप्रत्यधिदैवञ्च सूर्य्याश्वमाकृयेत्तथा ॥"
इक्ष्वाकोर्द्दशमपुत्त्रः । यथा, महाभारते । १३ । २ । ६ ।
"दशमस्तस्य पुत्त्रोऽभूद् दशाश्वो नाम भारत ॥")
दशास्यः, पुं, ( दश आस्यानि वदनानि यस्य । ) रावणः । इति भूरिप्रयोगः ॥ ( यथा, दशिकरञ्जने । ५ ।
"अकलियुगमखर्व्वमत्र हृद्यं
यचरदपापघनो यतः कुटुम्बी ।
मम रुचिरिह लक्ष्मणाग्रजेन
प्रभवति शर्म्म दशास्यमर्द्दनेन ॥")
दशास्यजित्, पुं, ( दशास्यं जयतीति । दशास्य + जि + क्विप् । तुगागमश्च । ) श्रीरामः । इति भूरिप्रयोगः ॥
दशेन्धनः, पुं, ( दशा वर्त्तिका इन्धनं काष्ठमिव यस्य । ) प्रदीपः । इति त्रिकाण्डशेषः ॥
दशेरः, पुं, ( दशतीति । दन्श + "पतिकठिकुठिगड़िगुड़िदंशिभ्य एरक् ।" उणां । १ । ५९ । इति एरक् । ) हिंस्रः । इत्युणादिकोषः ॥
दशेरकः, पुं, ( दशति दुःखं ददातीति । दन्श + एरक् । ततः कन् । ) मरुदेशः । तद्देशस्थे, पुं भूम्नि । इति हेमचन्द्रः ॥ ( यथा, महाभारते । ७ । ९ । १६ ।
"आवन्त्यान् दाक्षिणात्यांश्च पार्व्वतीयान् दशेर-[कान् ॥")
दशेरुकः, पुं, ( दशति दुःखानि ददातीति । दश + बाहुलकात् एरुक् ततः स्वार्थे कन् । ) मरुदेशः । इति भूरिप्रयोगः ॥
दस, इ क भासि । इति कविकल्पद्रुमः ॥ ( चुरां-परं-अकं-सेट् ।) इ क, दंसयति दंसति । भासि दीप्तौ । इति दुर्गादासः ॥
दस, इ ङ क दशौ । दंशे । इति कविकल्पद्रुमः ॥ ( चुरां-आत्मं-सकं-सेट् । ) दशिरिति पश्चतेरौणादिककिप्रत्यये रूपम् । इ ङ क, दंसयते फलं शिशुः पश्यति दशति वेत्यर्थः । भट्टमल्लमते दंश इह सनाहः । इति दुर्गादासः ॥
दस, य उ इर् उत्क्षेपे । इति कविकल्पद्रुमः ॥ ( दिवां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् । ) य, दस्यति धूलिं वायुः । उ, दसित्वा दस्त्वा । इर्, अदसत् अदासीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥
दस्मः, पुं, ( दस्यति उत्क्षिपति दक्षिणादिकमिति । दस + "इषियुधीन्धिदसिश्याधूसूभ्यो मक् ।" उणां । १ । १४४ । इति मक् । ) यजमानः । चौरः । हुताशनः । इति मेदिनी । मे, १५ ॥ खलः । इति शब्दरत्नावली ॥ (त्रि, उपक्षेपकः । यथा, ऋग्वेदे । १ । १४८ । ४ ।
"पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा ॥"
"दस्म उपक्षपयितायमग्निः ।" इति तद्भाष्ये सायनः ॥ दर्शनीयः । यथा, ऋग्वेदे ।१।७४।३।
"तं मेधेषु प्रथमं देवयन्तीर्विश उपब्रुवते दस्ममारीः ॥"
"दस्मं दर्शनीयं तमग्निमारीर्गच्छन्त्यः ।" इति तद्भाष्ये सायनः ॥ )
दस्युः, पुं, ( दस्यति परस्वान् नाशयतीति । दस + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणां । ३ । २० । इति युच् । बाहुलकादनादेशाभावः ।) चौरः । ( यथा, मनुः । ७ । १४३ ।
"विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ।
संपश्यतः सभृत्यस्य मृतः स न तु जीवति ॥")
रिपुः । ( यथा, ऋग्वेदे । २ । १२ । १० ।
"यः शर्द्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥"
"दस्योरुपक्षपयितुः शत्रोर्हन्ता घातकः ॥" इति तद्भाष्ये सायनः ॥) महासाहसिकः । इति शब्दरत्नावली ॥ असुरः । यथा, तत्रैव ।६।४७।२।
"कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा ॥"
"दस्युतर्हणा दस्यूनामसुराणां तर्हणा ॥" इति तद्भाष्ये सायनः ॥ कर्म्मवर्ज्जिते, त्रि । यथा, ऋग्वेदे । ६ । २४ । ८ ।
"न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ॥"
"शर्धते उत्सहमानाय दस्युजूताय कर्म्मवर्ज्जितैः प्रेरिताय ।" इति तद्भाष्ये सायनः ॥)
दस्रं, क्ली, ( दंसयते दृणादीन् दशतीति । दसि दंशे + "स्फायितञ्चिवञ्चिशकीति ।" उणां ।२। १३ । इति रक् । ) शिशिरम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥
दस्रः, पुं, ( दस्यति उत्क्षिपति पांशूनिति । दस उत्क्षेपे + "स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् । ) खरः । ( दस्यति रोगान् क्षिपतीति ।) अश्विनीसुतः । इति मेदिनी । रे, ४७॥ ( यथा, हरिवंशे । ९ । ५३ ।
"नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनीसुतौ ॥"
दर्शनीये, त्रि । यथा, ऋग्वेदे । ६ । ६९ । ७ ।
"इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ॥"
"दस्रा हे दर्शनीयाविन्द्राविष्णू ॥" इति तद्भाष्ये सायनः ॥ )
दस्रौ, पुं, ( दस्यतः क्षिपतो रोगानिति । दस + "स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् । ) अश्विनौ । इत्यमरः । १ । १ । ५४ ॥ द्विवचनान्तोऽयं शब्दः ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"दक्षादधीत्य दस्रौ वितनुतः संहितां स्वीयाम् ।
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ॥
"देवासुररणे देवा दैत्यैर्य्ये सहताः क्षताः ।
अक्षतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् ॥
वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः ।
सोमाच्छिपतितश्चन्द्रस्ताभ्यामेव सुखीकृतः ॥")
दस्रदेवता, स्त्री, ( दस्रौ अश्विनौ अधिष्ठातृदेवते यस्याः । ) अश्विनीनक्षत्रम् । इति हेमचन्द्रः ।२।२२॥
दस्रसूः, स्त्री, ( दस्रौ अश्विनौ सूते इति । सू प्रसवे + क्विप् । ) संज्ञा । सा सूर्य्यपत्नी अश्विनीकुमारमाता च । इति त्रिकाण्डशेषः ॥
दह, औ दाहे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) औ, अधाक्षीत् । दाहो भस्मीकरणम् । दहत्यग्निः काष्ठम् । इति दुर्गादासः ॥
दह, इ क दीप्तौ । दाहे । इति कविकल्पद्रुमः ॥ ( चुरां-परं-दीप्तौ अकं-दाहे सकं-सेट् ।) इ क, दंहयति । इति दुर्गादासः ॥
दहनं, क्ली, ( दह दाहे + भावे ल्युट् । ) दाहः । भस्मीकरणम् । पोडान इति भाषा ॥ ( यथा, रघुः ।८।२० ।
"इतरो दहने स्वकर्म्मणां
ववृते ज्ञानमयेन वह्निना ॥")
दहनः, पुं, ( दहतीति । दह दाहे + ल्युः । ) अग्निः । ( यथा, आर्य्यासप्तशत्याम् । ३०४ ।
"धूमैरश्रु निपातय दह शिखया दहन ! मलिनयाङ्गारैः ।
जागरयिष्यति दुर्गतगृहिणी त्वां तदपि शिशिरनिशि ॥"
तृतीयसंख्या । यथा, सूर्य्यसिद्धान्ते ।१२।८५।
"खत्रयाब्धिदहनाः कक्षा तु हिमदीधितेः ॥"
कृत्तिकानक्षत्रस्य अधिष्ठातृदेवत्वात् कृत्तिकानक्षत्रम् । यथा, ज्योतिस्तत्त्वे ।
"दहनविधिशताख्या मैत्रभं सौम्यवारे ॥")
चित्रकः । भल्लातकः । दुष्टचेतसि, त्रि । इति मेदिनी । ने, ७५ ॥ ( दह्यते कामाग्निना इति, दह + ल्युट् ।) कपोतः । इति राजनिर्घण्टः ॥ ( रुद्रविशेषः । यथा, महाभारते ।१।६६।३ ।
"दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः ।
स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥"
स्कन्दस्यानुचरविशेषः । यथा तत्रैव ।९।४५।३३।
"दहतिं दहनश्चैव प्रचण्डौ वीर्य्यसम्मतौ ।
अंशोऽप्युपाचरन् पञ्च ददौ स्कन्दाय धीमते ॥"
दाहकमात्रे, त्रि । यथा, भागवते ।८।७।२१।
"त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥")
दहनकेतनं, क्ली, ( दहनस्य केतनं ध्वज इव । ) धूमः । इति हेमचन्द्रः ।४।१७॥
दहनप्रिया, स्त्री, (दहनस्याग्नेः प्रिया ।) स्वाहा । इति त्रिकाण्डशेषः ॥
दहनागुरु, क्ली, ( दहनाय अगुरु । ) दाहागुरु । इति राजनिर्घण्टः ॥
दहनारातिः पुं, ( दहनस्याग्नेः अरातिः शत्रुः । ) जलम् । इति राजनिर्घण्टः ॥
दहनीयः, त्रि, ( दह्यते इति । दह + कर्म्मणि अनीयर् । ) दाह्यः । दहनार्हः ॥
दहनोपलः, पुं, ( दहनाय वह्न्युत्पादनाय य उपलः प्रस्तरखण्डः । ) सूर्य्यकान्तमणिः । इति हेमचन्द्रः ।४।१३३॥ दहनोपमोऽपि पाठः ॥

697